International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(6): 65-67
© 2026 IJMH
www.themultijournal.com

Received: 19-10-2026
Accepted: 05-11-2026
Publish : 06-11-2026

Golenur Khatun
PhD,research scholar,
National Sanskrit University,
Tirupati.

Correspondence:
Golenur Khatun
PhD,research scholar,
National Sanskrit University,
Tirupati.

श्रीमद्भागवतमहापुराणे राजनैतिक - भौगोलिक सम्बद्धा: तद्धितप्रयोगाः

Golenur Khatun

तद्धितप्रत्ययः

संस्कृतव्याकरणपरम्परायां प्रत्ययव्यवस्था शब्दनिर्माणस्य प्रमुखाधारः अस्ति। तेषु कृदन्तप्रत्ययानन्तरं तद्धितप्रत्ययाः अत्यन्तं व्यापकप्रयोगयुक्ताः, अर्थवैचित्र्यसम्पन्नाश्च प्रत्ययाः सन्ति। संस्कृतभाषायां नूतनप्रातिपदिकनिर्माण, सम्बन्धविशेषस्य प्रकाशने, वंशपरम्परायाः, देशस्य, जातेः, भावस्य, गुणस्य, विकारस्य, समूहस्य, संख्यायाः, मात्रायाः, देवतायाः, अपत्यस्य, गोत्रस्य च बोधने तद्धितप्रत्ययानां महत्त्वपूर्णा भूमिका वर्तते। अतः पाणिनीयव्याकरणे तद्धितप्रकरणं सर्वाधिकविस्तृतप्रकरणेषु अन्यतमं मन्यते।

पाणिनिमहर्षिणा अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमपादे "तद्धिताः" इत्यधिकारसूत्रेण तद्धितप्रकरणस्य प्रारम्भः कृतः। अस्य अधिकारस्य प्रवाहः पञ्चमाध्यायस्य समाप्तिपर्यन्तं दृश्यते। अनेन ज्ञायते यत् पाणिनिना तद्धितप्रत्ययानां विस्तीर्णं क्षेत्रं परिकल्पितम्। सम्पूर्णतया सहस्राधिकेषु सूत्रेषु बहवः प्रत्ययाः विविधानर्थेषु विहिताः सन्ति। एषा विस्तीर्णव्यवस्था संस्कृतभाषायाः शब्दनिर्माणशक्तिं, अर्थसमृद्धिं, व्याकरणवैज्ञानिकतां च प्रतिपादयति। शोधपत्रेऽस्मिन केवलं राजनैतिक -भौगोलिक सम्बद्धा: तद्धितप्रयोगा: एव अध्ययनार्थं स्वीकृता:।

भाषायां तद्धितप्रत्ययानां लाघवं महत्त्वं च

संस्कृतभाषायाः एकं प्रमुखं वैशिष्ट्यम् अस्ति 'लाघवम्' अर्थात् अल्पाक्षरैः प्रभूतार्थस्य प्रकटीकरणम् । तद्धितप्रत्ययाः अस्मिन् कार्ये अतीव सहायकाः भवन्ति ।

उदाहरणार्थम्, यदि कश्चित् वक्तुम् इच्छति यत् "अयं वसुदेवस्य अपत्यं पुमान् अस्ति", तर्हि एतावता दीर्घवाक्येन यः अर्थः प्रकटीभवति, सः एव अर्थः तद्धितप्रत्ययस्य साहाय्येन केवलं "वासुदेवः" इति पदेन स्पष्टः भवति । तथैव "यस्य समीपे अतीव धनम् अस्ति" इति वक्तुं "धनी" वा "धनवान्" इति पदं पर्याप्तम् अस्ति । अनेन स्पष्टं भवति यत् तद्धितप्रत्ययाः न केवलं भाषां सङ्क्षिप्तां कुर्वन्ति, अपितु तस्याः माधुर्यं काव्यमयीं च छटां वर्धयन्ति ।

अधश्च तद्धितप्रत्ययविधानोत्तरं प्रकृति-प्रत्ययोः काश्चन विशिष्टाः प्रक्रियाः आलोच्यन्ते।

श्रीमद्भागवते तद्धितप्रयोगः-

संस्कृतसाहित्यस्य अध्ययनेन ज्ञायते यत् महाकवयः स्वकाव्येषु तद्धितप्रत्ययानां प्रचुरं प्रयोगं कृतवन्तः। वाल्मीकिरामायणे, महाभारत-ग्रन्थे, कालिदासस्य रघुवंशादिषु महाकाव्येषु च तद्धितप्रत्ययान्ताः शब्दाः पदे पदे दृश्यन्ते ।

श्रीमद्भागवतमहापुराणे अपि भगवतः श्रीकृष्णस्य लीलायाः वर्णने 'वासुदेव', 'कौरव', 'यादव', 'माधुर्यम्', 'सौन्दर्यम्' इत्यादीनां तद्धितशब्दानाम् अतीव सुन्दरः प्रयोगः कृतः अस्ति । एतेषां शब्दानां प्रयोगेण छन्दसां निर्माणे, अनुप्रासादि-अलङ्काराणां सन्निवेशे च महती सरलता भवति ।

आधुनिके काले अपि संस्कृतेन सम्भाषणं कुर्वन्तः विद्वांसः प्रतिदिनं 'भारतीय', 'सांस्कृतिक', 'धार्मिक', 'ऐतिहासिक' इत्यादीनां तद्धितशब्दानां प्रयोगं कुर्वन्ति, येन भाषायाः प्रवाहे काचित् अपूर्वा स्वाभाविकता समागच्छति ।

श्रीमद्भागवते राजनैतिक भौगोलिक सम्बद्धा: तद्धितप्रयोगाः

कस्यचिद् देशस्य राजनैतिकस्थितिः तस्य तत्कालीनसंस्कृतिं पूर्णतः प्रभावितं करोति। भागवते अनेके राजनैतिकतद्धितप्रयोगाः प्राप्यन्ते, ये तत्कालीनजनपदानां, राज्ञां,तेषां प्रभावस्य च वर्णनं कुर्वन्तिः

पौरः –

कथमालक्षितः पौरैः सम्प्राप्तः कुरुजाङ्गलान्।
उन्मत्तमूकजडवद्विचरन् गजसाह्वये ॥ श्रीमद्भागवत(१/४/६)

पुर-शब्दात् 'तस्य निवासः' इति सूत्रेण 'अण्' प्रत्यये कृते 'पुर+अण्' इति भवति । ततः 'हलन्त्यम्' **(पा.सू-१/३/३)**सूत्रेण णकारस्य इत्संज्ञायां 'तस्य लोपः' **(पा.सू-१/३/९)**इति लोपे, 'तद्धितेष्वचामादेः'**(पा.सू- ७/२/११७)**इति सूत्रेण आदिवृद्धौ (पौर+अ), 'यचि भम्'**(पा.सू-१/४/१८)** इति भ-संज्ञायां 'यस्येति च'**(पा.सू-६/४/१५८)** इति अन्तिमस्वरस्य लोपे कृते 'पौर' इति सिद्धयति। पुरे ये निवसन्ति ते पौराः।

पाञ्चाली –

कुरु प्रतिश्रुतं सत्यं यत्तत्सान्त्वयता प्रियाम्।
प्रियं च भीमसेनस्य पाञ्चाल्या मह्यमेव च॥

श्रीमद्भागवत(१/७/५४)

जनपदनाम्ना राजकन्याः अपि ज्ञायन्ते स्म। 'जनपदशब्दात् क्षत्रियादञ्'**(पा.सू-४/१/१६८)** इति सूत्रेण पञ्चाल-शब्दात् अञ्-प्रत्यये, आदिवृद्धौ, 'यस्येति च' **(पा.सू-६/४/१४८)**इति लोपे 'पाञ्चाल' इति भवति। ततः 'टिड्ढाऽणञ्...' **(पा.सू-४/१/१५)**इति सूत्रेण स्त्रीलिङ्गे ङीप्-प्रत्यये कृते 'पाञ्चाली' (द्रौपदी) इति सिद्ध्यति।

गान्धारी -

तत्रासीनं कुरुपतिं धृतराष्ट्र सहानुजम्।
गान्धारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः॥

श्रीमद्भागवत(१/८/३)

एवमेव गन्धार-शब्दात् अञ्-प्रत्यये तथा ङीप्-प्रत्यये 'गान्धारी' इति निष्पद्यते। गन्धारदेशस्य राज्ञः पुत्री गान्धारी इति उच्यते।

सैनिकः -

सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य।
स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममाऽस्तु॥

श्रीमद्भागवत(१/९/३५)

'सेनाया वा" इति सूत्रेण सेनाशब्दात् 'ठक्' प्रत्यये कृते (सेना ठक्)। ककारस्य इत्संज्ञायां लोपे, 'ठस्येकः' **(पा.सू-७/३/५०)**इति सूत्रेण ठकारस्य 'इक' आदेशे, 'किति च' **(पा.सू-७/२/११८)**इति आदिवृद्धौ, भ-संज्ञायां 'यस्येति च'**(पा.सू-६/४/१४८)** इति लोपे 'सैनिक' इति रूपं भवति। राष्ट्ररक्षायै ये तत्पराः ते सैनिकाः।

कौरवः -

अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम्।
कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥श्रीमद्भागवत(१/१०/२०)

'ते तद्राजाः ' **(पा.सू-४/१/३७)**इति सूत्रेण कुरु-शब्दात् 'अण्' प्रत्यये, णकारलोपे, 'तद्धितेष्वचामादेः' **(पा.सू-७/२/११७)**इति आदिवृद्धौ 'कौरु+अ' इति भवति । ततः 'ओर्गुणः' **(पा.सू-६ /४/१४६)**इति उकारस्य ओ-आदेशे, 'एचोऽयवायावः' **(पा.सू-६/१/७८)**इति ओकारस्य अव्-आदेशे 'कौरव' इति निष्पद्यते । कुरुदेशस्य राजा इत्यर्थः।

सैन्धवः –

यद्दोष्णु मा प्राणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्तशलसैन्धवबालि-काद्यैः।अस्त्राण्यमोघमहिमानि निरुपितानि नो पस्पृशन्नृहरिदास-मिवाऽसुराणि ॥श्रीमद्भागवत(१/१५/१६)

सिन्धु-शब्दात् 'जनपदशब्दात् क्षत्रियादञ्' **(पा.सू-४/१/१६८)**इति सूत्रेण अञ्-प्रत्यये, आदिवृद्धौ, ओर्गुण इति सूत्रेण अवादेशे 'सैन्धव' इति सिद्धयति। सिन्धुदेशस्य राजा इत्यर्थे जयद्रथाय प्रयुक्तम्।

कम्बोज -

ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्यकुरुकैक-यसृञ्जयाद्याः।यास्यन्त्यदर्शनमलं बलपार्थभीम- व्याजाह्वयेन हरिणा निलयं तदीयम् ॥श्रीमद्भागवत(२/७/३५)

कम्बोजशब्दात् अञ्-प्रत्यये 'काम्बोज' इति भवति । एवमेव भरतशब्दात् अञ् - प्रत्यये 'भारत' इति सिद्धयति, यतः भरतेन शासितः देशः भारतम्।

आधिपत्यम् -

यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना
प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् ॥श्रीमद्भागवत(४/३/२)

अधिपति-शब्दात् 'दित्यदित्यादित्यपत्युत्तरपदाण् ण्यः' **(पा.सू-४/१/८५)**इति सूत्रेण ण्य-प्रत्यये. आदिवृद्धौ, "यस्येति च **"(पा.सू-६/४/१४८)**इति लोपे 'आधिपत्य' इति सिद्ध्यति । एवमेव च सेनापतिशब्दात् ण्य-प्रत्यये 'सैनापत्यम्' (सेनापतेः भावः कर्म वा) भवति। सम्राज-शब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' **(पा.सू-५/१/१२४)**इति सूत्रेण ष्यञ्-प्रत्यये 'साम्राज्यम्' सिद्ध्यति। साम्राज्यं विश्वप्रमुखता द्योतयति।

वैदर्भी -

उपयेमे वीर्यपणां वैदर्भी मलयध्वजः।
युधि निर्जित्य राजन्यान् पाण्ड्यः परपुञ्जयः॥

श्रीमद्भागवत(४/२८/२९)

विदर्भ-शब्दात् अञ्-प्रत्यये, ङीप्-प्रत्यये 'वैदर्भी इति सिद्धयति । एवमेव विदेह-शब्दात् अञ्-प्रत्यये 'वैदेह' (विदेहस्य राजा) तथा तस्मात् ङीप्-प्रत्यये 'वैदेही' (सीता) इति निष्पद्यते।

राजन्यः -

वेदाहं ते व्यवसितं हृदि राजन्यबालक।
तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥श्रीमद्भागवत(४/९/१९)

राजन्-शब्दात् 'राजश्वशुराद् यत्' **(पा.सू-४/१/१३७)**इति सूत्रेण यत्-प्रत्यये 'राजन्य' (राजकीयः पुरुषः) इति सिद्ध्यति । तथा च जनपद-शब्दात् अञ्-प्रत्यये 'जानपद' (जनपदस्य निवासी) इति सिद्धयति ।

कांचन -

आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ।
मृद्दार्वयः कांचनदर्भचर्मभि- र्निसृष्टभाण्डं यजनं समाविशत्॥

श्रीमद्भागवत(४/४/६)

कंचन-शब्दात् 'प्रज्ञादिभ्यश्च' **(पा.सू-५/४/३८)**इति सूत्रेण अण्-प्रत्यये, आदिवृद्धौ 'कांचन' (स्वर्णेन निर्मितम्) इति सिद्ध्यति । कलिङ्ग-शब्दात् अण्-प्रत्यये 'कालिङ्ग' इति सिद्ध्यति ।

उपसंहारः- एतेषां सर्वेषाम् उदाहरणानाम् अध्ययनेन स्पष्टं भवति यत् तद्धितप्रत्ययाः संस्कृतभाषायाः, विशेषतः श्रीमद्भागवत-महापुराणस्य, प्राणभूताः सन्ति। यथा कृत्प्रत्ययाः धातून् पल्लवितान् कुर्वन्ति, तथैव तद्धितप्रत्ययाः प्रातिपदिकानि पुष्पितानि कुर्वन्ति । भाषायाः सङ्क्षेपीकरणे, भावप्रकटीकरणे, अर्थगाम्भीर्ये च तद्धितप्र-त्ययानां महती भूमिका अस्ति । पाणिनेः अष्टाध्याय्यां सर्वाधिकानि सूत्राणि तद्धिताधिकारे एव सन्ति इति अस्य विषयस्य व्यापकतां प्रमाणीकरोति । अतः श्रीमद्भागवते प्रयुक्तानां तद्धितशब्दानाम् अध्ययनेन न केवलं भाषायाः अपि तु तत्कालीनसंस्कृतेः, समाजस्य, राजनैतिकव्यवस्थायाः च सम्यक् ज्ञानं भवति ।

सहायकग्रन्थसूची-

1. अष्टाध्यायी पाणिनिः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३ ।
2.व्याकरणशास्त्रेतिहासः युधिष्ठिरमीमांसकः सम्पादकः रामनाथ-त्रिपाठी, चौखम्बा पब्लिशर्स, वाराणसी, २००३।
3.श्रीमद्भागवतम्-कृष्णद्वैपायनव्यासः, भक्तिवेदान्त बुक ट्रस्ट, मुम्बाई, २०१८ ।
4.व्याकरणशास्त्रेतिहासः, डा. ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारती प्रकाशन् वारणासी, २००१
5.संस्कृत साहित्य का इतिहास, डा. उमाशङ्कर शर्मा ऋषि, चौरखम्बा भीरती अकादेमी, २०२१।
6.श्रीमद्भागवतमहापुराणम्,नवनीतप्रियः शास्त्री, विद्यानिधिः(ट्र-स्टं),नडियाद,२०११